# ডাকিনীস্তোত্রম্

{॥ ডাকিনীস্তোত্রম্ ॥}

আনন্দভৈরবী উবাচ

অথ বক্ষ্যে মহাকাল মূলপদ্মবিবেচনম্ ।

যত্ কৃত্বা অমরো ভূত্বা বসেত্ কালচতুষ্টযম্ ॥ ১॥

অথ ষটচক্রভেদার্থে ভেদিনীশক্তিমাশ্রযেত্ ।

ছেদিনীং সর্বগ্রন্থীনাং যোগিনীং সমুপাশ্রযেত্ ॥ ২॥

তস্যা মন্ত্রান্ প্রবক্ষ্যামি যেন সিদ্ধো ভবেন্নরঃ ।

আদৌ শৃণু মহামন্ত্রং ভেদিন্যাঃ পরং মনুম্ ॥ ৩॥

আদৌ কালীংসমুৎকৃত্য ব্রহ্মমন্ত্রং ততঃ পরম্ ।

দেব্যাঃ প্রণবমুদ্ধৃত্য ভেদনী তদনন্তরম্ ॥ ৪॥

ততো হি মম গৃহ্লীযাত্ প্রাপয দ্বযমেব চ ।

চিত্তচঞ্চীশব্দান্তে মাং রক্ষ যুগ্মমেব চ ॥ ৫॥

ভেদিনী মম শব্দান্তে অকালমরণং হর ।

হর যুগ্মং স্বং মহাপাপং নমো নমোঽগ্নিজাযযা ॥ ৬॥

এতন্মন্ত্রং জপেত্তত্র ডাকিনীরক্ষসি প্রভো ।

আদৌ প্রণবমুদ্ধৃত্য ব্রহ্মমন্ত্রং ততঃ পরম্ ॥ ৭॥

শাম্ভবীতি ততশ্চোক্ত্বা ব্রাহ্মণীতি পদং ততঃ ।

মনোনিবেশং কুরুতে তারযেতি দ্বিধাপদম্ ॥ ৮॥

ছেদিনীপদমুদ্ধৃত্য মম মানসশব্দতঃ ।

মহান্ধকারমুদ্ধৃত্য ছেদযেতি দ্বিধাপদম্ ॥ ৯॥

স্বাহান্তং মনুমুদ্ধৃত্য জপেন্মূলাম্বুজে সুধীঃ ।

এতন্মন্ত্রপ্রসাদেন জীবন্মুক্তো ভবেন্নরঃ ॥ ১০॥

তথা স্ত্রীযোগিনীমন্ত্রং জপেত্তত্রৈব শঙ্কর ।

ওঁ ঘোররূপিণিপদং সর্বব্যাপিনি শঙ্কর ॥ ১১॥

মহাযোগিনি মে পাপং শোকং রোগং হরেতি চ ।

বিপক্ষং ছেদযেত্যুক্ত্বা যোগং ময্যর্পয দ্বযম্ ॥ ১২॥

স্বাহান্তং মনুমুদ্ধৃত্য জপাদ্যোগী ভবেন্নরঃ ।

খেচরত্বং সমাপ্নোতি যোগাভ্যাসেন যোগিরাট্ ॥ ১৩॥

ডাকিনীং ব্রহ্মণা যুক্তাং মূলে ধ্যাত্বা পুনঃ পুনঃ ।

জপেন্মন্ত্রং সদাযোগী ব্রহ্মমন্ত্রেণ যোগবিত্ ॥ ১৪॥

ব্রহ্মমন্ত্রং প্রবক্ষ্যামি তজ্জাপেনাপি যোগিরাট্ ।

ব্রহ্মমন্ত্রপ্রসাদেন জডো যোগী ন সংশযঃ ॥ ১৫॥

প্রণবত্রযমুদ্ধৃত্য দীর্ঘপ্রণবযুগ্মকম্ ।

তদন্তে প্রণবত্রীণি ব্রহ্ম ব্রহ্ম ত্রযং ত্রযম্ ॥ ১৬॥

সর্বসিদ্ধিপদস্যান্তে পালযেতি চ মাং পদম্ ।

সত্ত্বং গুণো রক্ষ রক্ষ মাযাস্বাহাপদং জপেত্ ॥ ১৭॥

ডাকিনীমন্ত্ররাজঞ্চ শৃণুষ্ব পরমেশ্বর ।

যজ্জপ্ত্বা ডাকিনী বশ্যা ত্রৈলোক্যস্থিতিপালকাঃ ॥ ১৮॥

যো জপেত্ ডাকিনীমন্ত্রং চৈতন্যা কুণ্ডলী ঝটিত্ ।

অনাযাসেন সিদ্ধিঃ স্যাত্ পরমাত্মপ্রদর্শনম্ ॥ ১৯॥

মাযাত্রযং সমুদ্ধৃত্য প্রণবৈকং ততঃ পরম্ ।

ডাকিন্যন্তে মহাশব্দং ডাকিন্যম্বপদং ততঃ ॥ ২০॥

পুনঃ প্রণবমুদ্ধৃত্য মাযাত্রযং ততঃ পরম্ ।

মম যোগসিদ্ধিমন্তে সাধযেতি দ্বিধাপদম্ ॥ ২১॥

মনুমুদ্ধৃত্য দেবেশি জপাদ্যোগী ভবেজ্জডঃ ।

জপ্ত্বা সম্পূজয়েন্মন্ত্রী পুরশ্চরণসিদ্ধয়ে ॥ ২২॥

সর্বত্র চিত্তসাম্যেন দ্রব্যাদিবিবিধানি চ ।

পূজয়িত্বা মূলপদ্মে চিত্তোপকরণেন চ ॥ ২৩॥

ততো মানসজাপঞ্চ স্তোত্রঞ্চ কালিপাবনম্ ।

পঠিত্বা যোগিরাট্ ভূত্বা বসেত্ ষটচক্রবেশ্মনি ॥ ২৪ ॥

শক্তিযুক্তং বিধিং যস্তু স্তৌতি নিত্যং মহেশ্বর ।

তস্যৈব পালনার্থায মম যন্ত্রং মহীতলে ॥ ২৫॥

তত্ স্তোত্রং শৃণু যোগার্থং সাবধানাবধারয ।

এতৎস্তোত্রপ্রসাদেন মহালযবশো ভবেত্ ॥ ২৬॥

ব্রহ্মাণং হংসসঙ্ঘাযুতশরণবদাবাহনং দেববক্ত্র।

বিদ্যাদানৈকহেতুং তিমিচরনযনাগ্নীন্দুফুল্লারবিন্দম্

বাগীশং বাগ্গতিস্থং মতিমতবিমলং বালার্কং চারুবর্ণম্ ।

ডাকিন্যালিঙ্গিতং তং সুরনরবরদং ভাবযেন্মূলপদ্মে ॥ ২৭॥

নিত্যাং ব্রহ্মপরাযণাং সুখমযীং ধ্যাযেন্মুদা ডাকিনী।

রক্তাং গচ্ছবিমোহিনীং কুলপথে জ্ঞানাকুলজ্ঞানিনীম্ ।

মূলাম্ভোরুহমধ্যদেশনিকটে ভূবিম্বমধ্যে প্রভা।

হেতুস্থাং গতিমোহিনীং শ্রুতিভুজাং বিদ্যাং ভবাহ্লাদিনীম্ ॥ ২৮॥

বিদ্যাবাস্তবমালযা গলতলপ্রালম্বশোভাকরা।

ধ্যাত্বা মূলনিকেতনে নিজকুলে যঃ স্তৌতি ভক্ত্যা সুধীঃ ।

নানাকারবিকারসারকিরণাং কর্ত্রী বিধো যোগিনা।

মুখ্যাং মুখ্যজনস্থিতাং স্থিতিমতিং সত্ত্বাশ্রিতামাশ্রযে ॥ ২৯॥

যা দেবী নবডাকিনী স্বরমণী বিজ্ঞানিনী মোহিনী ।

মাং পাতু পিরযকামিনী ভববিধেরানন্দসিন্ধূদ্ভবা ।

মে মূলং গুণভাসিনী প্রচযতু শ্রীঃ কীতীচক্রং হি মা।

নিত্যা সিদ্ধিগুণোদযা সুরদযা শ্রীসংজ্ঞযা মোহিতা ॥ ৩০॥

তন্মধ্যে পরমাকলা কুলফলা বাণপ্রকাণ্ডাকরা

রাকা রাশষসাদশা শশিঘটা লোলামলা কোমলা ।

সা মাতা নবমালিনী মম কুলং মূলাম্বুজং সর্বদা ।

সা দেবী লবরাকিণী কলিফলোল্লাসৈকবীজান্তরা ॥ ৩১॥

ধাত্রী ধৈর্যবতী সতী মধুমতী বিদ্যাবতী ভারতী ।

কল্যাণী কুলকন্যকাধরনরারূপা হি সূক্ষ্মাস্পদা ।

মোক্ষস্থা স্থিতিপূজিতা স্থিতিগতা মাতা শুভা যোগিনা।

নৌমি শ্রীভবিকাশযাং শমনগাং গীতোদ্গতাং গোপনাম্ ॥ ৩২॥

কঙ্কেশীং কুলপণ্ডিতাং কুলপথগ্রন্থিক্রিয়াচ্ছেদিনী।

নিত্যাং তাং গুণপণ্ডিতাং প্রচপলাং মালাশতার্কারুণাম্ ।

বিদ্যাং চণ্ডগুণোদযাং সমুদযাং ত্রৈলোক্যরক্ষাক্ষরা।

ব্রহ্মজ্ঞাননিবাসিনীং সিতশুভানন্দৈকবীজোদ্গতাম্ ॥ ৩৩॥

গীতার্থানুভবপিরযাং সকলযা সিদ্ধপ্রভাপাটলাম্ ।

কামাখ্যাং প্রভজামি জন্মনিলযাং হেতুপিরযাং সৎক্রিযাম্ ।

সিদ্ধৌ সাধনতৎপরং পরতরং সাকাররূপাযিতাম্ ॥ ৩৪ ॥

ব্রহ্মজ্ঞানং নিদানং গুণনিধিনযনং কারণানন্দযানম্ ।

ব্রহ্মাণং ব্রহ্মবীজং রজনিজযজনং যাগকার্যানুরাগম্ ॥ ৩৫॥

শোকাতীতং বিনীতং নরজলবচনং সর্ববিদ্যাবিধিজ্ঞম্ ।

সারাত্ সারং তরুং তং সকলতিমিরহং হংসগং পূজযামি ॥ ৩৬॥

এতৎসম্বন্ধমার্গং নবনবদলগং বেদবেদাঙ্গবিজ্ঞম্ ।

মূলাম্ভোজপ্রকাশং তরুণরবিশশিপ্রোন্নতাকারসারম্ ॥ ৩৭॥

ভাবাখ্যং ভাবসিদ্ধং জযজযদবিধিং ধ্যানগম্যং পুরাণম্

পারাখ্যং পারণাযং পরজনজনিতং ব্রহ্মরূপং ভজামি ॥ ৩৮॥

ডাকিনীসহিতং ব্রহ্মধ্যানং কৃত্বা পঠেত্ স্তবম্ ।

পঠনাদ্ ধারণান্মন্ত্রী যোগিনাং সঙ্গতির্ভবেত্ ॥ ৩৯॥

এতৎপঠনমাত্রেণ মহাপাতকনাশনম্ ।

একরূপং জগন্নাথং বিশালনয়নাম্বুজম্ ॥ ৪০॥

এবং ধ্যাত্বা পঠেত্ স্তোত্রং পঠিত্বা যোগিরাড্ ভবেত্ ॥ ৪১॥

ইতি শ্রীরুদ্রযামলে উত্তরতন্ত্রে মহাতন্ত্রোদ্দীপনে

সিদ্ধমন্ত্রপ্রকরণে ষটচক্রসিদ্ধিসাধনে

ভৈরবভৈরবীসংবাদে ডাকিনী স্তোত্রং সম্পূর্ণম্ ॥ পটলঃ ৩০॥

From Digital Library at http://muktalib5.org

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Dakini Stotram Lyrics in Bengali PDF
% File name : DAkinIstotrarudrayAmalatantra.itx
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://muktalib5.org
% Proofread by : http://muktalib5.org, Daksha
% Description-comments : shrIrudrayAmale uttaratantre siddhamantraprakaraNe
% Latest update : March 29, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org

%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website